नृणामपि समुद्रादिलङ्घनादौ न दुष्यति"। रत्यादयोऽपि साधारण्येन प्रतीयन्त इत्याह "साधारण्येन रत्यादिरपि तद्वत् प्रतीयते"। रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत् परगतत्वेन त्वरस्यतापातः विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्त इत्याह "परस्य न परस्येति ममेति न ममेति च। तदास्वादे विभावादेः परिच्छेदो न विद्यते"। ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते "विभावनादिव्यापारमलौकिकमुपेयुषाम्। अलौकिकत्वमेतेषां भूषणं न तु दूषणम्"। आदिशब्दादनुभावनसञ्चारणे। तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। सञ्चारणं तथाभूतस्यैतस्य सम्यक्चारणम्। विभावादीनां यथासङ्ख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते "कारणं कार्य्यसञ्चारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारणान्येव ते मताः"। ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते "प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रपानकरसन्यायाच्चर्व्यमाणोरसो भवेत्"। यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे संजायते विभावादिसम्मेलनादिहापि तथेत्यर्थः। ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथं एकस्य द्वयोर्वा सद्भावेऽपि स स्यादित्युच्यते "सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्। झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते"। अन्यसमाक्षेपश्च प्रकरणादिवशात्। यथा "दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः सङ्क्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव। मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली छन्दो नर्त्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः"। "अत्र मालविकामभिलष्यतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः। एवमन्याक्षेपेऽप्यूह्यम्। "अनुकार्य्यगतो रसः" इति वदतः प्रत्याह "पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा। अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत्"। सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको, नाट्यकाव्यदर्शनादेः सान्तरायश्च। तस्मात् कथं रसरूपतामियात्। रसस्यैतद्धर्मत्रितयविलक्षणधर्मकत्वात्। अनुकर्त्तृगतत्वञ्चास्य निरस्यति "शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम्। दर्शयन् नर्त्तको नैव रसस्यास्वादको भवेत्"। किञ्च काव्यार्थभावने नायमपि सभ्यपदास्पदम्। यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदा सोऽपि सभ्यमध्य एव गण्यते"।

द्रव्यगतमधुरादिरसकारणादिकं सुश्रुते उक्तं यथा "अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः। आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः। तस्मादाप्यो रसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षात्तु ग्रहणम्। स खल्वाप्योरसः शेषभूतसंसर्गाद्विदग्धः षोढ़ा विभज्यते। तद्यथा मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। ते च भूयःपरस्परसंसर्गात् त्रिषष्टिधा भिद्यन्ते। तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः१। भूम्यग्निगुणबाहुल्यादम्लः२। तोयाग्निगुणबाहुल्याल्लवणः३ वाय्वग्निगुणबाहुल्यात् कटुकः४। वाय्वाकाशगुणबाहुल्यात्तिक्तः५। पृथिव्यनिलगुणबाहुल्यात् कषायः६ इति। तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः तत्र वायुरात्मनैवात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति। त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च"।

**रसकर्पूर** न० रसेन कर्पूरमिव। (रसकपुर) कर्पूररसे तत्पाकादिगुणा भावप्र० उक्ताः कर्पूररसशब्दे १७४१पृ० दृश्याः। [हारा०।

**रसकेसर** न० रसेन केसरमिव नागकेसरतुल्यगन्धित्वात्। कर्पूरे

**रसगन्ध** पुंन० रसे गन्धोऽस्य। १वोले गन्धरसे त्रिका०। कप् तत्रार्थे शब्दच० २गन्धके च राजनि०।

**रसगर्भ** न० रसो गर्भे यस्य। पित्तलधातुद्रवजे १रसाञ्जने अमरः। २हिङ्गुले च राजनि०। [राजनि०।

**रसघ्न** पु० रसं पारदं हन्ति हन–टक्। टङ्कणे (सोहागा)

**रसज** न० रसात् भुक्तान्नसारात् प्रथमधातोर्जायते जन–ड। १रुधिरे शब्दच० असृक्करशब्दे दृश्यम्। रसात् इक्षुप्रभृतेः द्रवात् जायते जन–ड। २गुडे पु० राजनि०। ३मद्यकीटे च पु० हेमच०। २रसभवादयोऽप्यत्र।

**रसज्ञा** स्त्री रसं जानाति अनया ज्ञा–करणे घञर्थे क।